National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024; 1**(55): 203-205
© 2024 NJHSR
www.sanskritarticle.com

**Neeraja B.**
Research Scholar,
Department of Sanskrit,
Osmania University,
Hyderabad

**Correspondence:**
**Neeraja B.**
Research Scholar,
Department of Sanskrit,
Osmania University,
Hyderabad

# मधुराविजयकाव्ये पूर्वकविप्रभावः

**बि. नीरजा**

**मधुराविजयकाव्यकर्त्र्याः परिचयः**

रचयित्री गङ्गादेवी। नवसर्गात्मकं काव्यम्। काकतीयसाम्राज्यपतनानन्तरं सङ्गमवंशजौ हरि-हररायबुक्करायौ हम्पी नगरमागतौ। सायणमाधवाचार्यः विद्यारण्यबिरुदाङ्कितः ताभ्यां हिन्दूमतधर्म-स्थापकं साम्राज्यं निर्मापयामास। तयोः द्वितीयस्य बुक्करायस्य पुत्रः कम्परायः। तदानीं दक्षिण-भारतावनिः महम्मदीयैराक्रान्ता आसीत्। विशेषतः तमिलनाडुराज्ये अल्पप्रमाणानि बहूनि राज्यानि तुरुष्काणां विधेयानि आसन्। वीरकम्परायः तान्सर्वान् जित्वा महम्मदीयान् मधुरायाः अपसार्य सुविशालं विजयनगरसाम्राज्यं स्थापितवान्। तस्येदं चरितवर्णनात्मकं महाकाव्यम्।

संस्कृतभाषायां स्त्रियः अपि बहूनि काव्यानि रचयामासुः। वेदकालादारभ्यैव स्त्रीणां कविता प्रसिद्धैव। वेदवाङ्मये वाचक्नवी, गार्गी, बडबा, प्रातिथेयी प्रभृतयः कवयित्र्यः लक्ष्यन्ते। इन्दुलेखा, कुन्तीदेवी, गौरिका, प्रकाशदत्ता, फल्गुहस्तिनी, मुक्तापीडा, मौर्यीका, प्रभुदेवी प्रभृतीनां नामान्यपि प्रसिद्धानि। वैदिकसूक्तेषु आश्वलायनः, वैशम्पायनः इमाः उदाहृतवान्।

लौकिकवाङ्मये A.D.950 कालिकः राजशेखरः काव्यमीमांसायां अवन्तीसुन्दरीम् उत्तमां प्रामाणिकां च कवयित्रीं उदाहृतवान्। अवन्तिसुन्दरी राजशेखरस्य धर्मपत्नी इति वाङ्मयचरित्रकारैः वर्णिता। वैदिकवाङ्मयानन्तरं स्त्रीभिः रचितेषु काव्येषु मधुराविजयकाव्यमेव प्राचीनतमं वर्तते। गङ्गादेव्याः जन्म, वंशः, पितृनामादिकमधिकृत्य काव्ये न किञ्चित् प्रस्तुतं वर्तते। उपलभ्यमान लिखितप्रतिषु स्पष्टतया सप्तमसर्गान्ते त्रिषु श्लोकेषु कम्परायः स्वयं स्वप्रियां गङ्गादेवीमाहूय स्वविजय कथां चरितं च रसमयेन काव्यरूपेण ग्रथनीयमित्युक्तवान्। सापि भर्तुः आज्ञां शिरसा धृत्वा काव्यमिदं रचितवतीति स्पष्टं ज्ञायते। प्रियेण आदिष्टा एकान्तविहारसमये सपदि सा चन्द्रोदयं वर्णितवती इति सप्तमसर्गान्ते दृश्यते। चन्द्रोदयवर्णनं च तत्र दशभिः श्लोकैः सर्गश्च असमाप्तः। सर्गे असमाप्तेऽपि कम्परायस्य अभ्यर्थना श्लोकत्रये स्पष्टतया दृश्यते।

**अथ कम्पनृपोऽपि कृत्यवित् कृतसन्ध्यासमयोचितक्रियः।**
**अवदत् सविधे स्थितां प्रियां भुवि गङ्गेत्यभिनन्दिताह्वयाम्।।**
**कमलाक्षि ! कटाक्ष्यतामयं समयो वर्णनया रसार्द्रया।**
**जन एव वचस्तवामृतं श्रवसा पाययितुं कुतूहली।।**
**इति सा दयितेन भाषिता दरनम्रं दधती मुखाम्बुजम्।**
**वदति स्म शनैः शुचिस्मिता सरसोदारपदां सरस्वतीम्।।**[1]

सप्तमसर्गसन्दर्भे केवलं तात्कालिकविहारवर्णनाय आदिष्टापि कालान्तरे सर्वमिदं काव्यं गङ्गादेवी एव रचितवती इति स्पष्टम्। कम्परायस्य धर्मपत्नी इति हेतोः अस्याः अभिजनः अपि श्लाघ्यः एव भवेत्।

**गङ्गादेव्याः कालः**

कम्परायस्य शासनकालः विजयनगरसाम्राज्यस्थापनकाल एव। अतः गङ्गादेव्याः कालः अपि A.D. 1367 प्रान्त एव। गङ्गादेव्याः कृतानि इतरकाव्यान्यपि नोपलब्धानि। मधुराविजय- काव्यमपि अस्मात्तिमिव लक्ष्यते। वीरकम्परायचरितं चेत् कम्परायस्य समग्रजीवितवर्णनात्मकं भवेत्। तथापि

तुरुष्कहस्तहतां मधुरा नगरीं तान् विजित्य पूर्ववैभवसम्पन्नां कृतवान् इति मधुराविजयशब्दार्थः गृहीतः चेत् काव्यं नवसर्गात्मकमपि सम्पूर्णमेव भवेत्।

**मधुराविजयकाव्ये पूर्वकविप्रभावः**

महाकवयः रसभावैकतत्पराः स्वेच्छया काव्यानि निबध्नन्ति। तदा कदाचित् पूर्वकविषु आदरातिशयेन वा यदृच्छया वा पूर्वकविभावाः महाकवीनां काव्येष्वपि दृष्टाः भवन्ति। एवंविधस्य अनुकरणस्य आनन्दवर्धनः संवादः इति नाम कल्पितवान्। श्रीमत् रामायणम् आदिकाव्यमिति एकस्मिन् रामायणे एव पूर्वकवीनां भावानुसरणं न दृष्टम्। महाभारतादारभ्य अनन्तरवर्तिषु सर्वेषु ग्रन्थेष्वपि पूर्वकवीनां भावानुसरणं दृष्टमेव। क्वचित् श्लोकाः अपि यथायथं गृहीताः नैष दोषाय इति आलङ्कारिकाः पूर्वकविभावानुसरणम् अङ्गीकृतवन्तः। वामनः काव्यालङ्कार-सूत्रवृत्तौ "अर्थदृष्टिः समाधिः"[2] इति सूत्र व्याख्यावसरे "अर्थो द्विविधः, अयोनिः अन्यच्छायायोनिर्वा" इत्यङ्गीकृतवान्। अयोनिः स्वतन्त्रः, अन्यच्छायायोनिः पूर्वकविभावस्यानुकरणमित्यर्थः। आनन्द-वर्धनाचार्यः ध्वन्या- लोके चतुर्थोद्येते एवंविधस्यानुकरणस्य औचित्यमपि बहुधा प्रतिपादितवान्।

**ध्वनेर्यः सगुणीभूतव्यङ्ग्यस्याध्वा प्रदर्शितः।**
**अनेनानन्त्यमायाति कवीनां प्रतिभागुणः।।**
**अतो ह्यन्यतमेनापि प्रकारेण विभूषिता।**
**वाणी नवत्वमायाति पूर्वार्थान्वियात्यपि।।**[3]

ध्वनिकारः एवंविधानि कतिपय उदाहरणानि निरूप्य अनुकृता-नामपि चमत्कारकारित्व-मङ्गीकृतवान्।

**दृष्टपूर्वा अपि ह्यर्था काव्ये रसपरिग्रहात्।**
**सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः।।**[4]

अभिनवगुप्तः कारिकामिमां विवृण्वन् एवमुक्तवान् - "दृष्टपूर्वा इति। बहिः प्रत्यक्षादिभिः प्रमाणैः प्राक्तनैश्च कविभिरित्युभयथा नेयम्। काव्यं मधुमासस्थानीयम्, स्पृहां लज्जामिति। रागवता-मुत्कलिका इति च। शब्दस्पृष्टेऽर्थे का हृद्यता। एतानि चोदाहरणानि वितत्य पूर्वमेव व्याख्यातानि इति किं पुनरुक्त्या। सत्यपि प्राक्तनकविस्पृष्टत्वे नूतनत्वं भवत्येवैतत्प्रकारानुग्रहादित्येतावति तात्पर्यं हि ग्रन्थस्याधिकं नान्यत्।" एवंविधान्यनुकरणानि कालिदासादिकाव्येष्वपि असङ्ख्याकानि दृश्यन्ते।

गङ्गादेवी मधुराविजयकाव्ये दशपूर्वकवीनां नामानि उदाहृतानि। तेषां काव्येभ्यः भावजात-मनूद्य स्वकाव्ये वर्णितवती। ते च - 1) कालिदासः 2) बाणभट्टः 3) भारविः 4) दण्डी 5) भवभूतिः 6) लीलाशुकः 7) तिक्कयज्वा 8) अगस्त्यः 9) गङ्गाधरः 10) विश्वनाथः। एतेषु महाकविषु तिक्कनः आन्ध्रमहाकविः। अगस्त्यः, गङ्गाधरः इति द्वौ काकतीयचक्रवर्तिनः आस्थान- कवी गङ्गादेव्याः विद्यागुरू इति प्रागुदाहृतौ। विश्वनाथोऽपि गङ्गादेव्याः गुरुः एव। दण्डिभवभूति- लीलाशुकानां काव्यभावानुसरणं मधुराविजयकाव्ये न दृष्टम्। केवलं कालिदास-बाणभट्ट-भारवीनां प्रभावः उदाहृतेषु कविषु मधुराविजयकाव्ये दृष्टः। अनुक्तेषु माघमहाकवेः, श्रीहर्षस्य च भावाना-मनुसरणं दृश्यते। अपि च वाल्मीकेः अपि भावानुसरणं तत्र तत्र दृष्टम्। काव्यनिर्माणे रसपोषणे च माघः एव गङ्गादेव्याः मार्गदर्शको वर्तते। ऋतुवर्णने भारवेः छायापि अनुसृता यत्र भावसादृश्यं वर्णनसादृश्यं वा स्पष्टतया न दृष्टं तथापि पठिते मधुराविजयश्लोके क्वचित् नैषधीयश्लोकानां स्मरणमपि भवति। एवमुदाहृतेषु अनुक्तेषु च कविषु कालिदास, बाणभट्ट, माघकवीनां भावानुसरणं विशेषतः मधुराविजयकाव्ये दृश्यते।

**मधुराविजयकाव्ये माघकवेः अनुकरणम्**

काव्यनिर्माणरीतिः माघादेव गङ्गादेव्या गृहीता इति स्पष्टं प्रतिभाति। काव्ये सूक्ष्मतरेपि कथांशे सति काव्यलक्षणसिद्धये यथावसरं तेषामवकाशं कल्पयित्वा विस्तरेण वर्णनं माघकाव्ये एव दृश्यते। किरातार्जुनीयेऽपि सन्दर्भं परिकल्प्य यद्यपि वर्णनानि कृतानि तानि माघादपि अल्पतराणि एव। पञ्चमहाकाव्येषु वीरशृङ्गारयोः वर्णनावकाशः माघकाव्ये एव दृष्टः। वीररसमङ्गिनं कृत्वा शृङ्गारादीनां तदङ्गभूतत्वेन वर्णनं माघे एव दृष्टम्। काव्यव्या-ख्यारम्भे मल्लिनाथः स्पष्टं एवं वर्णितवान्।

**नेतास्मिन्यदुनन्दनः स भगवान्वीरप्रधानो रसः**
**शृङ्गारादिभिरङ्गवान्विजयते पूर्णा पुनर्वर्णना।**
**इन्द्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलं**
**धन्यो माघकविर्वयं तु कृतिनस्तत्सूक्तिसंसेवनात्।।**[5]

मधुराविजयकाव्येऽपि यदुवंशे जातः कम्परायः एव नायकः शृङ्गारादयः अङ्गरसाः काव्ये अपेक्षितानि वर्णनानि सम्पूर्णतया निबद्धानि यथा चैद्यनाशः फलमिति माघे निरूपितं तथैव मधुराविजयेऽपि तुरुष्कवधेन काव्यं समाप्तम्। माघकाव्ये चैद्यस्य शिरसः छेदनेन यथा काव्यं समाप्तं तथा मधुराविजयेपि तुरुष्कशिरसः छेदेन काव्यसमाप्तिः दृष्टा। स्पष्टप्रतिपत्तये काव्यद्वयेऽपि समाप्तिनिरूपकौ श्लोकौ अत्र उदाह्रियेते। यथा माघकाव्ये -

**राहुस्त्रीस्तनयोरकारिसहसायेनाश्लथालिङ्गन-**
**व्यापारैकविनोददुर्ल्ललितयोः कार्क्कश्यलक्ष्मीर्वृथा।**
**तेनाक्रोशत एव तस्य मुरजित्तत्काललोलानल-**
**ज्वालापल्लवितेन मूर्द्धविकलं चक्रेण चक्रे वपुः।।**[6]

मधुराविजयकाव्ये यथा -

**अज्ञातसेवोचितचाटुवादं तुलुष्कसाम्राज्यकृताभिषेकम्।**
**दिवौकसामप्यकृतप्रणामं भूमौ सुरत्राणशिरः पपात।।**[7]

माघकाव्ये द्वितीयसर्गान्ते एव कृष्णः राजसूययागार्थं गन्तुमेव कृतनिश्चयः प्रतस्थे तृतीय- सर्गादारभ्य एकादशसर्गपर्यन्तात्मको विषयः काव्यलक्षणसम्पादनार्थमेव निबद्धः। तत्रापि षण्णां ऋतूनां वर्णनं यौगपद्येन कृष्णप्रभावात् तेषां सम्पातः वर्णितः। एवं

कृष्णान्तःपुरस्त्रीणां जल- क्रीडादिवर्णनं कृतम्। एवमेव क्वचित् जलक्रीडादिषु काव्यद्वये भावसाम्यमपि दृष्टम्। यथा माघे ग्रीष्मादारभ्य वसन्तपर्यन्तम् ऋतूणां परिवृत्तिः वर्णिता तथा मधुराविजयकाव्येपि दृश्यते। एवं काव्यनिर्माणसंविधाने मधुराविजय-काव्यं शिशुपालवधकाव्यमनुकरोति।

अनन्तरवर्तिनः आन्ध्रकवयः गङ्गादेव्याः मधुराविजयकाव्यात् भावान् सङ्गृह्य स्वीयकाव्येषु पद्यानि रचितवन्तः। पूर्वकविप्रभावा-धिक्यवर्णनेन काव्ये लाघवं भवतीति शङ्का कदापि न कार्या। मल्लिनाथादयोऽपि महाकाव्यव्याख्यानावसरे तत्तत् सन्दर्भेषु यथोचितं निदानभूतान् पूर्वकविश्लोकान् उदाहरन्त्येव। न तावता कालिदासादीनां यशसः कापि क्षतिः तथैव मधुराविजयकाव्ये पूर्वकविषु आदरातिशयेन गङ्गादेवी तत्तत्कवीनां भावान् अङ्गीकृत-वती इति सहृदयाः विदां कुर्वन्तु।

**परिशीलितग्रन्थसूची**


1) मधुराविजयम् - गङ्गादेवी, सम्पादकः – जी. हरिहरशास्त्री, श्रीधर् पवर् प्रेस्, त्रिवेण्ड्रम्, 1924.
2) मधुराविजयम्(भावप्रकाशिका व्याख्यापेतम्)-पोतुकूचि सुब्रह्मण्य-शास्त्री, के.एल्.एन्. संस्कृतकलाशाला, तेनालिपत्तनम्, 1969.
3) शिशुपालवधम् - माघः, वेङ्कटेश्वर स्ट्रीम् प्रेस्, मुम्बयी, 1982.
4) ध्वन्यालोकः- आनन्दवर्धनः, मोती लाल बनारसीदास्, वारणासी, 1967.
5) काव्यालङ्कारसूत्रवृत्तिः- वामनः, निर्णयसागर प्रेस्, मुम्बई, 1973.
6) साहित्यदर्पणः - विश्वनाथः, निर्णयसागरप्रेस्, मुम्बई, 1982.


**सन्दर्भाः**

1. मधुराविजयम् - 7.39-41 श्लो.
2. काव्यालङ्कारसूत्रवृत्तिः - वामनः - 3.2.6-8 सूत्राणि
3. ध्वन्यालोकः - 4.1,2 कारिका, पृ.1308, 1310
4. ध्वन्यालोकः - 4.4 कारिका, पृ.1326
5. शिशुपालवधम् - पीठिका - 7 श्लो., मल्लिनाथव्याख्या
6. शिशुपालवधम् - 20.78 श्लो.
7. मधुराविजयम् - 9.38 श्लो.